॥ प्रदक्षिणनमस्कारविधिः ॥

अन्यद्गुह्यतमं
किञ्चित्कथयामि तवाग्रतः ।

प्रदक्षिणे फलं चैव नमस्कारे तथैव च ॥

पञ्चाशद्भिर्भवेत्
लक्ष्मीः शतैश्च विजयः स्मृतः ।

लक्षे तु सर्वसिद्धिः
स्यात् नात्र कार्या विचारणा ॥

भविष्यपुराणतः

॥ श्रीवृन्दावनाष्टकम् ॥

मुकुन्दमुरलीरवश्रवणफुल्लहृद्वल्लरी
कदम्बककरम्बितप्रतिकदम्बकुञ्जान्तरा ।
कलिन्दगिरिनन्दिनीकमलकन्दलान्दोलिना
सुगन्धिरनिलेन मे शरणमस्तु वृन्दाटवी ॥ १॥

विकुण्ठपुरसंश्रयाद् विपिनतोऽपि निःश्रेयसात्
सहस्रगुणितां श्रियं प्रदुहती रसश्रेयसीम् ।
चतुर्मुखमुखैरपि स्पृहिततार्णदेहोद्भवा
जगद्गुरुभिरग्रिमैः शरणमस्तु वृन्दाटवी ॥ २॥

अनारतविकस्वरव्रततिपुञ्जपुष्पावली
विसारिवरसौरभोद्भमरमाचमत्कारिणी ।
अमन्दमकरन्दभृद्विटपिवृन्दवृन्दीकृत
द्विरेफकुलवन्दिता शरणमस्तु वृन्दाटवी ॥ ३॥

क्षणद्युतिघनश्रियोव्रजनवीनयूनोः पदैः
सुवल्गुभिरलङ्कृता ललितलक्ष्मलक्ष्मीभरैः ।
तयोर्नखरमण्डलीशिखरकेलिचर्योचितै-
र्वृता किशलयाङ्कुरैः शरणमस्तु वृन्दाटवी ॥ ४॥

व्रजेन्द्रसखनन्दिनीशुभतराधिकारक्रिया
प्रभावजसुखोत्सवस्फुरितजङ्गमस्थावरा ।
प्रलम्बदमनानुजध्वनितवंशिकाकाकली
रसज्ञमृगमण्डला शरणमस्तु वृन्दाटवी ॥ ५॥

अमन्दमुदिरार्बुदाभ्यधिकमाधुरीमेदुर
व्रजेन्द्रसुतवीक्षणोन्नटृनतीलकण्ठोत्करा ।
दिनेशसुहृदात्मजाकृतनिजाभिमानोल्लसल्-
लताखगमृगाङ्गना शरणमस्तु वृन्दाटवी ॥ ६॥

अगण्यगुणनागरीगणगरिष्ठगान्धर्विका
मनोजरणचातुरीपिशुनकुञ्जपुञ्जोज्ज्वला ।
जगत्त्रयकलागुरोर्ललितलास्यवल्गत्पद
प्रयोगविधिसाक्षिणी
शरणमस्तु वृन्दाटवी ॥ ७॥

वरिष्ठहरिदासतापदसमृद्धगोवर्धना
मधूद्वहवधूचमत्कृतिनिवासरासस्थला ।
अगूढगहनश्रियो मधुरिमव्रजेनोज्ज्वला
व्रजस्य सहजेन मे शरणमस्तु वृन्दाटवी ॥ ८॥

इदं निखिलनिष्कुटावलिवरिष्ठवृन्दाटवी
गुणस्मरणकारि यः पठति सुष्ठु पद्याष्टकम् ।
वसन् व्यसनमुक्तधीरनिशमत्र सद्वासनः
स पीतवसने वशी रतिमवाप्य विक्रीडति ॥ ९॥

इति श्रीरूपगोस्वामिविरचितस्तवमालायां
श्रीवृन्दावनाष्टकं सम्पूर्णम् ।

॥ श्रीतुलसी अष्टोत्तरशतनामावली ॥

ॐ श्री तुलस्यै नमः ।ॐ नन्दिन्यै नमः ।ॐ देव्यै नमः ।ॐ शिखिन्यै नमः ।ॐ धारिण्यै नमः ।ॐ धात्र्यै नमः ।ॐ सावित्र्यै नमः ।ॐ सत्यसन्धायै नमः ।ॐ कालहारिण्यै नमः ।ॐ गौर्यै नमः ।ॐ देवगीतायै नमः ।ॐ द्रवीयस्यै नमः ।ॐ पद्मिन्यै नमः ।ॐ सीतायै नमः ।ॐ रुक्मिण्यै नमः ।ॐ प्रियभूषणायै नमः ।ॐ श्रेयस्यै नमः ।ॐ श्रीमत्यै नमः ।ॐ मान्यायै नमः ।ॐ गौर्यै नमः ॐ गौतमार्चितायै नमः ।ॐ त्रेतायै नमः ।ॐ त्रिपथगायै नमः ।ॐ त्रिपादायै नमः ।ॐ त्रैमूर्त्यै नमः ।ॐ जगत्रयायै नमः ।ॐ त्रासिन्यै नमः ।ॐ गात्रायै नमः ।ॐ गात्रियायै नमः ।ॐ गर्भवारिण्यै नमः ।ॐ शोभनायै नमः ।ॐ समायै नमः ।ॐ द्विरदायै नमः ।ॐ आराद्यै नमः ।jॐ यज्ञविद्यायै नमः ।ॐ महाविद्यायै नमः ।ॐ गुह्यविद्यायै नमः ।ॐ कामाक्ष्यै नमः ।ॐ कुलायै नमः ।ॐ श्रीयै नमः ।ॐ भूम्यै नमः ।ॐ भवित्र्यै नमः ॐ सावित्र्यै नमः ।ॐ सरवेदविदाम्वरायै नमः ।ॐ शंखिन्यै नमः ।ॐ चक्रिण्यै नमः ।ॐ चारिण्यै नमः ।ॐ चपलेक्षणायै नमः ।ॐ पीताम्बरायै नमः ।ॐ प्रोत सोमायै नमः ।ॐ सौरसायै नमः ।ॐ अक्षिण्यै नमः ।ॐ अम्बायै नमः ।ॐ सरस्वत्यै नमः ।ॐ संश्रयायै नमः ।ॐ सर्व देवत्यै नमः ।ॐ विश्वाश्रयायै नमः ।ॐ सुगन्धिन्यै नमः ।ॐ सुवासनायै नमः ।ॐ वरदायै नमः ।ॐ सुश्रोण्यै नमः ॐ चन्द्रभागायै नमः ।ॐ यमुनाप्रियायै नमः ।ॐ कावेर्यै नमः ॐ मणिकर्णिकायै नमः ।ॐ अर्चिन्यै नमः ।ॐ स्थायिन्यै नमः ।ॐ दानप्रदायै नमः ।ॐ धनवत्यै नमः ।ॐ सोच्यमानसायै नमः ।ॐ शुचिन्यै नमः ।ॐ श्रेयस्यै नमः ।ॐ प्रीतिचिन्तेक्षण्यै नमः ॐ विभूत्यै नमः ।ॐ आकृत्यै नमः ।ॐ आविर्भूत्यै नमः ।ॐ प्रभाविन्यै नमः ।ॐ गन्धिन्यै नमः ।ॐ स्वर्गिन्यै नमः ।ॐ गदायै नमः ।ॐ वेद्यायै नमः ।ॐ प्रभायै नमः ।ॐ सारस्यै नमः ।ॐ सरसिवासायै नमः ।ॐ सरस्वत्यै नमः ।ॐ शरावत्यै नमः ।ॐ रसिन्यै नमः ।ॐ काळिन्यै नमः ।ॐ श्रेयोवत्यै नमः ।ॐ यामायै नमः ।ॐ ब्रह्मप्रियायै नमः ।ॐ श्यामसुन्दरायै नमः ।ॐ रत्नरूपिण्यै नमः ।ॐ शमनिधिन्यै नमः ॐ शतानन्दायै नमः ।ॐ शतद्युतये नमः ।ॐ शितिकण्ठायै नमः ।ॐ प्रयायै नमः ।ॐ धात्र्यै नमः ।ॐ श्री वृन्दावन्यै नमः ।ॐ कृष्णायै नमः ।ॐ भक्तवत्सलायै नमः ।ॐ गोपिकाक्रीडायै नमः ।ॐ हरायै नमः ॐ अमृतरूपिण्यै नमः ।ॐ भूम्यै नमः ।ॐ श्री कृष्णकान्तायै नमः ।ॐ श्री तुलस्यै नमः ॥

॥ तुलसीस्तुति ॥

तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे ।
नमस्ते नारदनुते नारायणमनःप्रिये ॥ १॥
मनः प्रसादजननि सुखसौभाग्यदायिनि ।
आधिव्याधिहरे देवि तुलसि त्वां नमाम्यहम् ॥ २॥
यन्मूले सर्वतीर्थानि यन्मध्ये सर्वदेवताः ।
यदग्रे सर्व वेदाश्च तुलसि त्वां नमाम्यहम् ॥ ३॥
अमृतां सर्वकल्याणीं शोकसन्तापनाशिनीम् ।
आधिव्याधिहरीं नृणां तुलसि त्वां नम्राम्यहम् ॥ ४॥
देवैस्त्वं निर्मिता पूर्वं अर्चितासि मुनीश्वरैः ।
नमो नमस्ते तुलसि पापं हर हरिप्रिये ॥ ५॥
सौभाग्यं सन्ततिं देवि धनं धान्यं च सर्वदा ।
आरोग्यं शोकशमनं कुरु मे माधवप्रिये ॥ ६॥
तुलसी पातु मां नित्यं सर्वापद्भ्योऽपि सर्वदा ।
कीर्तिताऽपि स्मृता वाऽपि पवित्रयति मानवम् ॥ ७॥
या दृष्टा निखिलाघसङ्घशमनी स्पृष्टा वपुःपावनी
रोगाणामभिवन्दिता निरसनी सिक्ताऽन्तकत्रासिनी ।
प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य संरोपिता
न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ॥ ८॥



इति तुलसीस्तुतिः समाप्ता ।

॥ वृन्दादेव्यष्टकम् ॥

विश्वनाथचक्रवर्ती ठकुरकृतम् ।

गाङ्गेयचाम्पेयतडिद्विनिन्दिरोचिःप्रवाहस्नपितात्मवृन्दे ।
बन्धूकबन्धुद्युतिदिव्यवासोवृन्दे नुमस्ते चरणारविन्दम् ॥ १॥
बिम्बाधरोदित्वरमन्दहास्यनासाग्रमुक्ताद्युतिदीपितास्ये ।
विचित्ररत्नाभरणश्रियाढ्ये वृन्दे नुमस्ते चरणारविन्दम् ॥ २॥
समस्तवैकुण्ठशिरोमणौ श्रीकृष्णस्य वृन्दावनधन्यधामिन् ।
दत्ताधिकारे वृषभानुपुत्र्या वृन्दे नुमस्ते चरणारविन्दम् ॥ ३॥
त्वदाज्ञया पल्लवपुष्पभृङ्गमृगादिभिर्माधवकेलिकुञ्जाः ।
मध्वादिभिर्भान्ति विभूष्यमाणाः वृन्दे नुमस्ते चरणारविन्दम् ॥ ४॥
त्वदीयदौत्येन निकुञ्जयूनोः अत्युत्कयोः केलिविलाससिद्धिः ।
त्वत्सौभगं केन निरुच्यतां तद्वृन्दे नुमस्ते चरणारविन्दम् ॥ ५॥
रासाभिलाषो वसतिश्च वृन्दावने त्वदीशाङ्घ्रिसरोजसेवा ।
लभ्या च पुंसां कृपया तवैव वृन्दे नुमस्ते चरणारविन्दम् ॥ ६॥
त्वं कीर्त्यसे सात्वततन्त्रविद्भिः लीलाभिधाना किल कृष्णशक्तिः ।
तवैव मूर्तिस्तुलसी नृलोके वृन्दे नुमस्ते चरणारविन्दम् ॥ ७॥
भक्त्या विहीना अपराधलेशैः क्षिप्ताश्च कामादितरङ्गमध्ये ।
कृपामयि त्वां शरणं प्रपन्नाः वृन्दे नुमस्ते चरणारविन्दम् ॥ ८॥
वृन्दाष्टकं यः शृणुयात्पठेच्च वृन्दावनाधीशपदाब्जभृङ्गः ।
स प्राप्य वृन्दावननित्यवासं तत्प्रेमसेवां लभते कृतार्थः ॥ ९॥
इति विश्वनाथचक्रवर्ती ठकुरकृतं वृन्दादेव्यष्टकं सम्पूर्णम् ।

॥ वृन्दावनस्तोत्रम् ॥

वृन्दाटवी सहजवीतसमस्तदोषा
दोषाकरानपि गुणाकरतां नयन्ती ।
पोषाय मे सकलधर्मबहिष्कृतस्य
शोषाय सुस्तरमहाघचयस्य भूयात् ॥ १॥
वृन्दाटवी बहुभवीयसुपुण्यपुञ्जा
क्षेत्रातिथिर्भवति यस्य महामहिम्नः ।
तस्येश्वरः सकलकर्म मृषा करोति
ब्रह्मादयस्तमतिभक्तियुता नमन्ति ॥ २॥
वृन्दावने सकलपावनपावनेऽस्मिन्
सर्वोत्तमोत्तमचरस्थिरसत्त्वजातौ ।
श्रीराधिकारमणभक्तिरसैककोशे
तोषेण नित्यपरमेण कदा वसामि ॥ ३॥
वृन्दावने स्थिरचराखिलसत्त्ववृन्दा-
नन्दाम्बुधिस्वपनदिव्यमहाप्रभावे ।
भावेन केनचिदिहाऽमृति ये वसन्ति
ते सन्ति सर्वपरवैष्णवलोकभूम्नि ॥ ४॥
इति वृन्दावनस्तोत्रं सम्पूर्णम् ।

॥ तुलसीमहिमा ॥

महादेव उवाच ।

विष्णुप्रीतिं करोत्वेषा तरुर्भूत्वा महीतले ।
शरीरमर्ज्यतामस्याः श्रीविष्णुप्रीतये गणाः ॥ १॥
अस्याः पत्रेण वृन्दायाः पूजितः स्यात् स्वयं हरिः ।
नान्येनेति सुविज्ञेयं मणिमुक्तादिनापि च ॥ २॥
नामास्यास्तुलसीत्यस्तु पवित्रायाः सुपावनम् ।
तकारो मरणं प्रोक्तं तद्योगः स्यादुकारतः ॥ ३॥
मृता लसति चेत्येवं तुलसीत्येव गीयते ।
स्थितः प्रतिदलेष्वस्या मन्त्रो द्वादशवर्णकः ॥ ४॥
अधिष्ठात्री देवतास्यामावां देवीमहेश्वरौ ।
नारायण उपास्योऽस्याः प्रियेयं वैष्णवी मता ॥ ५॥
(द्वादशवर्णकः अथवा द्वादशाक्षरविष्णुमन्त्रः
ॐ नमो भगवते वासुदेवाय ।)



॥ इति बृहद्धर्मपुराणे सप्तमोऽध्याये महादेवप्रोक्तं
तुलसी प्रादुर्भावसहिता तुलसीमहिमा सम्पूर्णा ॥

।। श्रीतुलसीनामाष्टकस्तोत्रम् अष्टनामावलिश्च ।।

वृन्दा वृन्दावनी विश्वपूजिता विश्वपावनी ।

पुष्पसारा नन्दिनी

च तुलसी कृष्णजीवनी ।।

एतन्नामाष्टकं स्तोत्रं

पठन्मङ्गलमाप्नुयात् ।

वृन्दायै नमः । वृन्दावन्यै नमः ।

विश्वपूजितायै नमः ।

विश्वपावन्यै नमः । पुष्पसारायै

नमः । नन्दिन्यै नमः ।

तुलस्यै नमः । कृष्णजीवन्यै नमः ।। (८)



श्रीतुलसीनामाष्टकस्तोत्रम् अष्टनामावलिश्च

वृन्दा वृन्दावनी विश्वपूजिता विश्वपावनी ।
पुष्पसारा नन्दिनी च तुलसी कृष्णजीवनी ॥

वृन्दायै नमः । वृन्दावन्यै नमः । विश्वपूजितायै नमः ।
विश्वपावन्यै नमः । पुष्पसारायै नमः । नन्दिन्यै नमः ।
तुलस्यै नमः । कृष्णजीवन्यै नमः ॥ (८)

॥ श्रीतुलसीषोडशकनामस्तोत्रं नामावलिश्च ॥

तुलसी श्रीमहालक्ष्मीः
विद्याऽविद्या यशस्विनी ।
धर्म्या धर्मावनासक्ता पद्मिनी श्रीर्हरिप्रिया ॥
लक्ष्मीप्रियसखी देवी द्यौर्भूमिरचला चला ।
षोडशैतानि नामानि तुलस्याः कीर्तयेन्नरः ।
लभते सुतरां भक्तिं अन्ते विष्णुपदं लभेत् ॥

तुलस्यै नमः । श्रीमहालक्ष्म्यै
नमः । विद्यायै नमः । अविद्यायै
नमः । यशस्विन्यै नमः । धर्म्यायै नमः ।
धर्मावनासक्तायै नमः ।
पद्मिन्यै नमः । श्रियै नमः । हरिप्रियायै नमः ।
लक्ष्मीप्रियसख्यै नमः । देव्यै नमः । दिवे
नमः । भूम्यै नमः ।
अचलायै नमः । चलायै नमः ।